प्रणह्य-[A]पिनह्य, प्रणह्य, प्रणाह्य, प्रणिनत्स्य, प्रणानह्य ;

नाहम् २, } नाहम् २, } निनत्सम् २ } नानहम् २ ; }
नद्ध्वा २, } नाहयित्वा २, } निनत्सित्वा २, } नानहित्वा २. }

(670) " णासृ शब्दे " (I-भ्वादिः-625. अक. सेट्. आत्म.)

'शब्दार्थे नासते नासेः, कौटिल्ये नसते नसेः ॥' (श्लो. 184) इति देवः।

नासकः-सिका, नासकः-सिका, निनासिषकः-षिका, नानासकः-सिका ;
[1]नासा,[B] इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककासतिवत् (188) ज्ञेयानि।

(671) " णिक्ष चुम्बने " (I-भ्वादिः-659. सक. सेट्. पर.)

चुम्बनम्=वक्त्रसंयोगः इति क्षीरस्वामी ।

[2]प्रनिक्षकः-प्रणिक्षकः, निक्षकः-क्षिका, निनिक्षिषकः-षिका, नेनिक्षकः-क्षिका ;
निक्षिता-त्री, निक्षयिता-त्री, निनिक्षिषिता-त्री, नेनिक्षिता-त्री ;
[C]निक्षन्-न्ती, निक्षयन्-न्ती, निनिक्षिषन्-न्ती ; —
[3]निट्-निक्षौ-निक्षः ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचिल्लतिवत् (528) ज्ञेयानि ।

(672) " णिजि शुद्धौ " (II-अदादिः-1026. सक. सेट्. आत्म.)

[4]निञ्जकः-ञ्जिका, निञ्जकः-ञ्जिका, निनिञ्जिषकः-षिका, [5]नेनिञ्जकः-ञ्जिका ;
निञ्जिता-त्री, निञ्जयिता-त्री, निनिञ्जिषिता-त्री, नेनिञ्जिता-त्री ;

---

1. 'गुरोश्च हलः' (3-3-103) इत्यकारप्रत्ययः स्त्रियाम् ।
2. 'वा निंसनिक्षनिन्दाम्' (8-4-33) इति उपसर्गस्थान्निमित्तात् परस्य कृत्प्रत्ययपरकस्य निक्षतेः नकारस्य णत्वविकल्पः। तिङन्ते तु 'कृत्यचः' (8-4-29) इति नित्यं णत्वमेव।
3. 'स्कोः--' (8-2-29) इति कलोपे, षकारस्य जश्त्वचर्त्वयो रूपम् ।
4. 'इदितो नुम् धातोः' (7-1-58) इति नुम्। एवं सर्वत्र ज्ञेयम्। 'णो नः' (6-1-65) इति नत्वम् ।
5. 'गुणो यङ्लुकोः' (7-4-82) इति अभ्यासस्य गुणः। एवं यङन्ते सर्वत्र ज्ञेयम् ।

A. 'दृष्ट्वोर्णुवानान् ककुभो बलौघान् वितत्य शार्ङ्गं कवचं पिनह्य।' भ. का. 3.47.

B. 'नासोत्थरासलसिताञ्चसितेन दाम्ना
सूतो ययाम समराभ्यसितान् तुरङ्गान् ॥' धा. का. 1.79.

C. 'उक्षन्नेनं मन्दहासेन रक्षन् विश्वं निक्षन् वल्लवीस्तृक्षिताघाः ॥' धा. का. 1.83.